स्पर्शोवायुगुणः।रूपंतेजोगुणः।रसोजलगुणः॥गंधःपृथिवीगुणः॥एतेगुणाः आकाशमार
भ्यपृथिवीपर्यंतंउत्तरोत्तरमेकैकगुणाधिकेनपंचदशगुणास्संपद्यंते॥एतेषांगुणानांपंच
दशभावेनश्रीविद्यापंचदशाक्षरीज्ञाता॥तत्स्वरूपंवक्तुमाविर्भूतेत्याह॥पंचदशाक्षररूपे
तिभोगिकाभिमता॥भूतसंबंधेनाभिता॥इष्टाअतएवपंचदशाक्षररूपास्तासांविर्भूतगुणानां
पंचदशकानांविद्याक्षरेणाप्यविद्याक्षरेणापिपंचदशवैतानद्रूपातत्स्वरूपिणीनित्याकूट
स्थानरंगबहुरूपेनानामंबुधिरिवसकलतत्वाविर्भावभूरित्यर्थः॥तथाचदहरविद्यायां एकोऽहं
द्वितीयंअनंतमपारंविज्ञानघनएवैतेभ्योभूतेभ्यःसमुत्थायतान्येवानुविनश्यतीति।मंत्रोपनिषदि
च।यस्मिन्भावाःप्रतीयंतेत्रिकोनंदाश्चत्रिकादिक्षितिपर्यंतंषट्त्रिंशत्तत्वसंचयाः।यस्मो

र्भिबुद्धुदाभासाः तस्तं वंदेचिन्महोदधी॥ इतिकूटस्थयाएवषोडश्याः पंचदशावयवात्मकपंचदशेति
थिनिष्ठिता॥ पंचदशदेवतामयपंचदशाक्षरीरूपतामाह॥ नित्याक्लिन्थ्याकाराइति॥ नित्याः कामे
श्वरीप्रभृतिचित्रांताः॥ तिथ्याकाराः तिथ्यभिमानिन्योदेवताः॥ तिथयश्चप्रतिपत्प्रभृतिपरिपू
र्णांताः॥ शिवशक्तिसमरसाकाराः प्रकाशविमर्शसंपुटाकाराः॥ अतएवदिवसनिशामय्यः दि
वारात्रिरूपाः॥ प्रकाशविमर्शयोर्दिवारात्रित्वात्॥ तथाचोक्तं॥ सानिशासकलालोकमोहि
नीवासरस्मरवलुसर्वबोधकः॥ तास्तिथयश्रीवर्णाः तेपिनेष्टवीक्तरूपेणपंचदशरूपाः॥ श्रीवर्णाः
विद्यांतर्गतवर्णगणाः॥ अपिनेष्टयोरूपाः॥ तादृशप्रकाशविमर्शरूपादृत्यर्थः॥ दृश्यंचपंचदशाक्ष
रौ॥ ऋग्वेदसंहितायनशारवायांआम्नाताःयथाकामोयोनिःकमलेत्यादि॥ तस्मिन्नेवेदेन्यत्र ३९
चत्वारईविभ्रतिक्षिपयंतदुस्रावपीडंविद्याविद्योततइतिवर्णेयंतिकेचित्॥ अयंमंत्रविवेकः॥

यमेवप्रकाशविमर्शमयीपराशक्तिः॥ पंचभूतात्मिकाऽनंतरोनंतरगुणदृष्टिद्वारापंचदशसंख्याक
मात्राक्षरनित्यभिमानिदेवतास्वरूपिणीज्ञाता॥ तथायथागमः॥ एकएवप्रकाशाख्यःपरःकोपि
महेश्वरः॥ यस्यशक्तिर्विमर्शाख्यास्तिस्रोयेनवुधैः॥ विमर्शाख्याकस्यादेवीपंचदशेतिध्यंस
मागता॥ विमर्शरूपिणीनित्याषोडशीयाप्रकीर्तिता॥ गतासाषोडशैर्भेदैःत्रिपुरापरमेश्वरी॥
सुंदर्यादिमहाद्वंद्वविचित्रांतंसमंततः॥ स्वागमादेववोधव्याभिन्नसंकेतमात्रतः॥ प्रतिप्रभातोदे
व्याःपोर्णमास्यांतकंप्रियेएकैकंरजयेद्यस्तुससौभाग्यमवाप्नुयात्॥ सुभगोदयवासनाया
मपिरवंवायुर्वोन्नितस्तूरुद्रादिगुणभेदतः॥ इत्थंचतेथाव्याप्तयः व्यापिकाः रजयाम्य
हंइतिइतः परंविद्यादेवतेयोरयंताभेदनभेदोस्तिवेद्यवेदकयोरितिउक्तमेवार्थंदृढयितुंदे
वतावीह्यायाअपिविश्वात्मकत्वंतदुत्तीर्णत्वंव्यक्तमाह॥ अज्यंजनविंदुत्रयसमष्टिभेदै

र्विभावितानाकाराः॥षड्ङ्गैरात्तवास्तानत्वानीतानचेकेवलाविद्या॥१८॥विद्यापिनादशास्तस्मा
त्रिपुरसुंदरीदेवी॥विद्यावेद्यात्मकयोरत्यंताभेदमाननंस्यार्थः॥१९॥इति॥अथः स्वराः॥व्यं
जनाहलः॥विंदुत्रयंअनुस्वारत्रयंएषांसमष्टिःसमुदायभावःभेदोवयवभावः॥विभा
वितानाकाराः॥उद्भावितस्वरूपाअतएवषड्ङ्गैरात्तवास्ताः॥द्रीवादिस्त्रियंततत्वविग्रहः॥
तेचानीताचानत्वंघसमुदायस्थानतान्॥नहुत्तीर्णत्वाच्च॥अतएवकेवलास्यव्यति
रिक्तस्याभावात्एकाकिनीएवंभूताविद्याश्रीपंचदशाक्षरीत्यर्थः॥अयमत्रविद्यया
अवयवविभागःप्रकारःदूहपुण्यानंदाःहादिविद्ययोरत्यंताभिमानिनोस्त्राएवविद्या
भाव याअवयवसमुदायंमाश्रित्यतत्वोत्कर्षात्तदुत्तीर्णत्वंमाचक्षते॥अत्रकाम्भवारव्ये ३२
प्रथमखंडेपंचस्वराः॥सप्तव्यंजनानि॥संहत्यैहदशवर्णाः॥कामराजाख्येद्वितीयखंड

डेषट्स्वराः॥अष्टव्यंजनानि॥संभूयचतुर्दशवर्णाः॥शक्त्याख्येतृतीयखंडेचत्वारस्वराः
पञ्चव्यंजनानि॥संहत्यदशवर्णाः॥सर्वेविसंभूयषड्ङ्गैरक्षराणि॥अतएवरूपाणिसमुदाय
रूपाणि॥विद्यासर्वतत्त्वातीतकांताःपरिवर्तीः॥ननुकादिविद्यैवसर्वसिद्धाश्रयते॥सत्यं॥कादि
विद्यातुकामोयोनिरित्याद्युपनिषदिप्रथमःप्रतिपाद्यते॥तथापिहादिविद्यापित्रैकोट्यता
कथं॥षष्ठंसप्तममथवाद्वितीयंतृतीयंचतुर्थंपंचमंवेदयंतः॥इत्यादिनातत्तद्विद्या
पिश्रुतिप्रसिद्धैव॥तस्मात्तत्तद्विद्याएवउभयात्मकत्वमितिहवर्णतामित्येवा
वगंतव्यं॥ननुतर्हिकादिविद्याअपिउभयात्मकत्वाभावेनतत्समुपास्यत्वंदुर्घटंस्यात्॥
उच्यते॥देवतावैजात्यात्॥तत्कथं॥हादिरेवोभयात्मकत्वंप्रतिपाद्यते॥अत्रोच्यते॥नवयंहादि
विद्यैवतादृशीनत्वादीदृशीतिवदामः॥किंतुहादिरेवाभिप्रेतानकादिरित्येवतावन्मात्र

नुक्तं॥अन्यत्रतथाव्याख्यानात्॥कादेरपिविद्याऽभयात्मकमस्त्येव।दृश्यतेवअनयोर्विद्ययो
र्भेदः।हादेःप्रथमखंडेपंचस्वरः॥सप्तव्यंजनानि॥कादेःप्रथमखंडेसप्तस्वराः।पंचव्यंज
नानि॥संहत्यविद्याहृदयेऽपिप्रथमखंडेहृदक्षरवर्णवंसमानं।तस्माद्भयात्मकत्वमुभयोर्वि
द्ययोरस्त्येव।तदुभयविद्योपासनाप्रकारस्तुगुरुमुखादेवअवगंतव्यःदेवताया अपि
मंत्रवत्तूभयात्मकत्वमितिमंत्रदेवतयोरैक्यमाह।विद्यापिताद्गात्मेति॥विद्या
चिदानंदस्वरूपिणी॥ताद्गात्माविश्वात्मिकातदुनीरणीच।सूक्ष्मापरिछेत्तुमशक्या
सासर्ववेदांतेषुप्रसिद्धात्रिपुरसुंदरीत्रिपुराचसुंदरीत्रिधावस्थितस्यमत्तवस्तुपरम
तू॥सर्वयोगिभिरुपास्यत्वेनस्तूयतांचत्रिपुराशब्दनिर्वचनंचपूर्वमेवप्रपंचितं॥देवी
स्वयंप्रकाशरूपाविश्वजनादिक्रियारूपा।परावाक्।विद्यावेद्यात्मकयोरस्यांनाभेदभाम ३३

नेत्यार्याः॥सार्वकालिकैरैक्यंआमनंति॥सर्वत्रप्रतिपादयंति।आर्याःपरमेश्वरप्रमुखाः
परमयोगिनइत्यर्थः॥तथाचिदंबररहस्ये॥अहंपंचाक्षरःसाक्षात्वंतुपंचदशाक्षरी॥चतु
र्दशीचयस्यस्यपदार्थस्यायाशक्तिरुदाहृता।सासासर्वेश्वरीदेवीससर्वोपिमहेश्वरः॥व्या
प्तपंचदशार्णापाविद्याश्रुतिरूपात्मिका।पंचभिश्चतथाषड्भिःचतुर्भिरपिवाक्षरैः।स्वरव्यं
जनभेदेनसप्तत्रिंशत्प्रभेदिनी॥सप्तत्रिंशत्प्रभेदेनषड्विंशात्मस्वरूपिणी॥तत्वानीतत्स्वरू
पमुपपाद्यते॥यथादेवाहवैप्रजापतिमनुवंकेयंतनुः॥किंरूपा।किंयद्वर्णा।किंकरोति।
किंददाति।केनवासिध्यति।किंकरवामेति।देवैःपृष्टःप्रजापतिःप्रत्युत्तरमाह॥सेदृशीलो
कातीतोचिंत्योवाच्यइत्यादिना॥सर्वोत्तरत्वंपंचदशाक्षर्याःप्रतिपाद्यश्रीपंचदशाक्षरीमेव
देवेभ्यउपदिशतिययातनुरुदाहरिष्यामः॥ओदेरादिब्रह्महृदीयावाणीद्वतीयोमारःततो

महेंद्रः॥इयंस्रक्काव्यं॥धर्मसंतानमयमिति॥द्वितीयमुदाहरिष्यामः॥ओंदेवादिदेवः॥ततस्सुधा
मयंततःप्रजानामीशः॥ततोहंसः॥ततोऽग्निः॥ततोयमात्मायंध्रुवोनामार्थसंतानभोगानंद
मयमिति॥तृतीयमुदाहरिष्यामः॥ओंहोजीवनेशः॥ततोविश्वक्षोभाता॥ततोजगन्माताल
क्ष्मीः॥ततोपराशक्तिः॥स्वरूपमेवंनामचिंतामणिर्महाभावाभावमयमिति॥अत्रायंप्रथमःपारम्भ
इतिप्रथमखंडमुपदिशति॥द्वितीयमुदाहरिष्यामइतिद्वितीयखंडमुपदिशति॥तृतीयमुदा
हरिष्यामइतितृतीयखंडमुपदिशति॥उपरिश्रयंपुनरपितन्मंत्रमाहात्म्यमाह॥तानेकधा
सममवं॥तदेतन्महामनुरिति॥तदाख्यानंसुरव्याःसवर्णीःरूपपरमात्रिपुरात्रयीभा
त्रिविधगुणात्रिवर्गरूपाण्यत्यनिर्मलानिरवद्यानिष्प्रपंचात्मविद्याविभुःपरविद्याइति॥यत
एवंवेदविद्वान्भवति॥अथाहुर्विद्वांसइतिरहोरहस्यमिदंयंत्रिदंयमिति॥सएवंमानिभ्र ३४
तिशि॥

तानिसर्वंसृष्टंजगतिरक्षतिसंहरति॥अन्यथाकरोति॥अणुर्महान्कृशःस्थूलहृस्वदीर्घव्यापी
व्यापकः॥श्रीभगवतोवंशोभवति॥यएवंवेदसेवसोभवति॥अस्याःऋषेरर्थः॥संप्रदायादेवा
वगंतव्यं॥इतिनलिरव्यतेरसस्मरसंज्ञेहपिहादिविद्योद्धारउक्तः॥तत्रवचनानिकानि
चिल्लिरव्यते॥विद्यांतुनवमींसम्यक्प्रवक्ष्यामिसमासतः॥ललितायांतुश्रीदेवीमादनेत्या
दितल्लक्षणात्॥मादनःप्राणरूपस्तुविकाराःशिवउच्यते॥सकारस्त्वपरोज्ञेयःसंकोचःशा
क्तिरूपकः॥संकोचःपरमाशक्तिःकिंकासःपरमःशिवः॥संकोचश्चविकासश्चहंसइत्य
क्षरद्वयं॥तयोराधाररूपेणकर्तव्यंबिंदुमालिनी॥प्राणोबिंदुरितिप्रोक्तोसहचर्यात्सधने॥
अधोधरेंदुमाकारंज्वलनंतुतयोरधः॥मायाविंदूर्धगाश्चैववाग्भवेनादिकीलि
तः॥श्रीहंसपरमेश्वरेणमाशक्तिस्तुसमाख्याताऽदनस्वीकारकःशिवः॥सहिमादनइत्युक्तो

हकारश्चेशावसंज्ञकः॥ तत्रशक्तिर्यथार्थत्वेसकारस्त्विधीयते॥ शिवोहकार इत्युक्तः सकारश्श
क्तिरव्यया॥ बिंदुमालिनिकाणीस्यत्पर्यायंपरमेश्वरं॥ शक्तिर्व्योमानलोरणीयमायाबिंदूश्वरा
दयः॥ यथास्थितास्थितान्यतत्तथ्यंवाभवस्यनिलाविलः॥ द्वावन्योकामराजस्यारव्यवर्णो
निष्कलंकालकोटिः॥ इत्यादिद्रष्टव्यं॥ श्रीचक्रोथभट्टारिकोपि॥ इत्थंश्रीरप्यपिस्थलवाभ
वेति॥ सर्वलोकप्रसिद्धाः॥ अत्रश्रुतिः॥ चत्वारिवाक्परिमितापदानितानिविदुर्ब्राह्मणायम
नीषिणाः॥ गुहात्रीणिनिहितानींगयंति॥ तुरीयंवाचोमनुष्यावदंतिइत्यादिश्रुतिश्च
क्रेवमभेदमुक्त्वा चक्रदेवतेयोरैक्यंवक्तुं चक्रोत्पत्तिप्रकारमाह॥ ॥यासांतरोहस्तू
पापराभट्टारिकाश्रीत्रिभाविताकारा॥ स्पष्टापरयंत्यादित्रिमात्रकात्माचचक्रतांयाता॥२०॥
चक्रस्यापिभट्टारिकायानभेदस्तथापिविभाव्यतेविबुधैः॥ अनयोस्तूक्ष्माकारापरेवसा ३५

स्थूलसूक्ष्मयोश्चक्रापिभिदा॥२१॥इतियासांतरूहस्तूपाअंतरंअंतःकरणंतस्मिन्रूहाविता
र्कः॥ इतीतिपरिच्छेदरहितः॥ तेनरहितंस्तूपंयस्यास्सा॥ अयमर्थः॥ अथाज्ञानसंगोचरासर्व
वेदांतेपरिच्छेद्यसर्वकारणभूताश्रीकादिपरारूपंतत्त्वसंघातावि भावभूमिः॥ महेश्वरी
परासर्वोत्कृष्टस्तुच्यते॥ यश्रुतिः॥ परास्यशक्तिर्विविधैवश्रूयतेति॥ यतोवाचोनिवर्तंतेऽप्रा
प्यमनसासह॥ आनंदंब्रह्मणोविद्वान्नबिभेतिकुतश्चन॥ यथागमश्च॥ सस्तूपज्योतिरीपांतःपरावा
गनपायिनी॥ यस्यांदृष्टस्वस्तूपाधिकारोनिवर्तते॥इति॥ लघुभट्टारिकाश्च॥ सात्वंका
चिदसंभेद्यस्तूपमहिमाशक्तिःपरागीयते॥ एवंभूतालक्षणासेवपराशक्तिरेवत्रिभाविताप्रि
कारत्वेनभाविता॥ संजातभावनाएतदेवाह॥ स्पष्टापरयंत्यादित्रिमात्रकासेति॥ स्पष्टाप्रपंचोत्प
न्नत्वेनविवक्षितात्रिषयिणीपरयंतीत्युच्यते॥ आदिशब्देनमध्यमावैखरीग्राह्यासेवेखरी

नाम। अभिल्लवनरूपिणी। पंचदशाक्षरी राज्ञिमयी सर्वैदिकलौकिककरा ब्जालालिका
शक्तिरुच्यते। यथोक्तं सुभगोदयवासनायां। परा भट्टारिका पञ्चदशी नीवल्लीगुप्तसमुद्वाम
ध्यमासोरभोवेरवर्यक्षमालाजयत्यसौ॥ अस्मदुक्तौचिदानंदवासनायामपि। विवक्षाव
वसायोक्तिरूपाएतास्त्रिमातरः॥ त्रिखंडात्मकचक्रैक्यमियादित्यर्थः॥ तदेवाह॥ चक्रस्य
त्रैलोक्यमोहनादिवेंदवांतकनवावरणात्मकस्यसुंदर्यधिष्ठानभूतस्यमहेश्वराः तदधि
ष्ठात्र्याः सुंदर्याश्चभेदलेशाः॥ ईषदूनेदीपबुधैर्महेश्वरैर्नभाव्यतेनानुभूयते। कुतः श्री
सुंदरीस्वरूपत्वाच्चक्रस्य॥ तथाचोपनिषत्। महतरामहिनादेवतानां। नवयोनिर्नवचक्रा
णिदीधिरेनवैवयोगानवयोनिन्यश्च॥ नवानांचक्राअधिनाथास्यानानवसुद्रानवभ
द्रामहीनां॥ एकाआसीत्प्रथमासानवआसीद्द्वासूनविंशाद्वासूनत्रिंशात्॥ इति॥ वाम ३६

केश्वरनंत्रे॥ तच्चक्रिपंचकंसृष्ट्वालयेनाग्निचतुष्टयं पंचाशाच्चतुराननिसंयोगाच्चक्रसंभवः
एतच्चक्रावतारंतुकथयामिवराननेः॥ यथासापरमाशक्तिरित्युक्त्वा। चक्रंकामकलारू
पाप्रसारपरंपरमार्थइत्यंतेनसम्यगभेदः अभेदप्रतिपादितः॥ क्रोधभट्टारिकोपि। श्रीच
क्रंश्रीनृसलकोत्रमधिनंसंसारचक्रालकमित्यादिपुनरपि। तादृगभेदमेतयोर्व्यो च
क्षे। अनयोस्सूक्ष्माकारेत्यादिना। अनयोस्सूक्ष्मरूपयोश्चक्रदेवतयोः सूक्ष्मरूपत्वेनाप
रिछिन्नत्वमेव॥ तत्रश्रीचक्रस्यसूक्ष्मरूपिणावस्थानंबिंदुरूपनाभिरेवश्रापरिछिन्नत्वंबिंदुरूप
रमाकाराइत्यादिनाप्रपंचितमेवदेवतायामपि। विद्यापितादृगासेत्यादिनाअभिहितमेव
तथास्थूलयोश्चक्रदेवतयोश्च॥ अत्रस्थूलत्वंनामचक्रस्यत्रिकोणादिचतुरस्रपर्यंतऊर्ध्व
एंदेवतायाअपित्रिपुरांबिकादित्रिपुरेशान्तंतत्तत्रूपेणमननं॥ एवंविधयोश्चक्रदेवतयो

भेदाभेदकारणादित्यर्थः॥ तत्रहेतुमाह॥ सापरेवसूक्ष्माकाराइति॥ सापदवीक्तलक्षणापरेवआदि
शक्तिरेव॥ सूक्ष्माहकारासूक्ष्मभूताआकारस्वरूपमनयोरित्यर्थः॥ तथाचोक्तं॥ चतुरस्रात्यं॥ स्थू
लसूक्ष्मविभेदेनत्रैलोक्यास्थितिमातृकाइति॥ अतएवहेतोरिषड्वेदोपिविद्वद्भिर्नीलभ्यते॥
एवमेवहिविद्युतोयमभेदचिंतनं॥ सर्वत्रतथाप्रीतिः॥ सर्वंखल्विदंब्रह्मेति। सर्वंतुपरादेवी
न्यत्रात्मनःसर्वंऽतरत्रग्रंथकारोपिवक्ष्यति॥ सेषंपरामहेश्वरीचक्राकारेणपरिणमतयदेति॥
देवतारूपंचक्रस्य॥ इतःपरंपरापश्यंत्यादित्रितयानत्रविकाररूपंनवयोन्यात्मकचक्रंवक्तु
मादौवेदंवसर्वानंदाख्यचक्रंपराशक्तिमयमित्याह॥ मध्यंचक्रस्यात्परामयंबिंदुतत्वमे
वेदं॥ ऊर्ध्वमूर्ध्वंतुचयदात्रिकोणरूपेणापरिणतंस्थूलं॥ एतत्सर्वंस्यात्रितयनिधानं
त्रिबिंदुरूपंचेति॥ २२॥ चक्रस्यनवयोन्यात्मकस्यमध्येभवंबिंदुतत्वंबिंदुस्वरूपंदवीक्त

MEMORIAL

मेवव्याख्यानं॥ इदंस्वसाक्षात्रूपंपरामयमेवपराशक्तिरूपमित्यर्थः॥ तथाचोक्तं॥ प्रस्फुरंवि
श्वलहरीमातृस्थानत्रयात्मकं॥ वेदंचक्रमितितत्रैव॥ सूक्ष्मरूपं॥ समस्तारूपदंपरं
मलिंगकं॥ बिंदुरूपपरानंदकथंनित्यपरोदितंमिति॥ यथाबिंदुःविमर्शोधर्मःत्रिपुरासम
कोणाइति॥ विरूपाक्षपंचाशिकायां॥ एतदेवबिंदुतत्वंयथाविकासभावमयते॥ तथा
त्रिकोणचक्रमुदेतीत्याह॥ ऊर्ध्वमूर्ध्वंतुचयदाइति॥ यदायस्मिन्प्राणिनामदृष्टवशादु
र्ध्वमूर्ध्वंसज्ञानविकासंभवतितथात्रिकोणरूपेणअनुत्तरानंदचितिरिच्छाज्ञाकोणियो
ज्यसंघटरूपेणपरिणतं॥ त्रिकोणाकारेणभवतीत्यर्थः॥ तथाचोक्तंश्रीत्रिपिकाया
मत्रेअनुत्तरानंदचितिरिच्छाज्ञाकोणियोजिता॥ त्रिकोणमितितत्राहुः॥ विसर्गसंज्ञं
दसुंदरंमेयमातृप्रमाणात्मसरेःसंकुचत्प्रभं॥ शृंगाटरूपमापन्नमिच्छाज्ञानक्रिया

त्रिकमिति॥शृंगाटरूपंत्रिकोणमित्यर्थः॥तथासुभगोदयवासनायामपि॥इच्छादिशक्तित्रितयं
पश्चोःसत्त्वादिसंज्ञकं॥महाव्यश्रंभवयामिगुरुवक्त्रादनुत्तरमिति॥प्रत्यभिज्ञायामपिस्वांग
रूपेषुभावेषुसत्यज्ञानक्रियेच्छया॥मायातनीयएवपश्चोस्तत्वरजस्तमइति॥इच्छाज्ञानक्रि
यारूपंयएवपश्यंत्यादिशक्तित्रितयतामापन्नाः॥तदाहाइच्छाशक्तिस्तथावामापश्यंती
रूपुषास्तथाज्ञानशक्तिस्तथाज्येष्ठामध्यमाकनीयसीति॥॥अनुत्तरेवामयीविश्वस्थितोप्र
थितविग्रहा॥तत्रेहदिक्वरायांतुवैरवंरूपमास्थितापरास्वात्मनिक्रमेणवश्यगाटकवदुज्ज्व
लक्रियाशक्तिस्तुरौद्रीयंवैखरीविश्वविग्रहेति॥श्रीतंत्रसद्भावेपि॥वामाज्यैष्ठातुमान्त्रकालोकेपरने
जस्समुन्निता॥तेयाव्याप्तमिदंसर्वंआब्रह्मस्तुवनांतरमित्यादिभ्यएकैकेवंत्रिधासातुप्रजा ३८
यंतइत्यंतेन॥परापश्यंत्यादिशक्तिजातिलक्षणंकृतं॥तत्तुनात्रएवअवधार्यंइहतुग्रं

विस्तरभयान्नलिख्यते॥त्रिवीजरूपंचेति॥त्रिवीजात्रिखंडात्मकवाग्भवकामराजशक्तिवी जानांस्वरूपंयत्तन्न॥तथाचश्रीनित्याःनित्यक्लिन्नापरास्त्रिपथगाविश्वचर्षणयत्राकथाअक्षरासर्न्निवे
शा॥अधिष्ठायीनामजरापुरातनीमहत्तरामहिनादेवतानांमित्यादिनासर्वतःत्रिखंडात्मकमा
न्त्रकाधिष्ठानकारणादित्यश्चंगाटपीठेमाहुर्वामकेश्वरतंत्रेपित्रीवीजत्रयसुक्तस्यसकलस्यमनोः
पुनःएतानिवाच्यरूपाणिकुलकौलमयानितु॥इतित्रीवीजत्रयशक्तित्रयलिंगत्रियेतमयंत्रि
कोणंकामकलाक्षररूपमाहभगवान्परमःशिवः॥ततःश्रीपराभट्टारिकायामिदमेवविदुत्त
त्पूर्वार्धोसुरत्नवयोन्यात्मकेनवयोन्यात्मकश्रीचक्रंभवदित्याहुरत्रवामाज्येष्ठारौद्रीचं
बिकायानुत्तरांत्राभतास्युःइच्छाज्ञानक्रियाख्यांताश्चैतास्तुचोत्तराचेयवाः॥व्यक्ताव्यक्ततदर्ण
इयमिदमेकादशानुपश्यंती॥२३॥वामाज्येष्ठारौद्रीअंबिकाचक्रकलाकारानूणपराशक्तिश्चेमाः
पंचशक्तयःअनुत्तरांत्राभताः॥अनुत्तरांत्राःश्रीचक्रांतर्गताधोसुरत्वानिपंचत्रिकोणानितेन

संनिवि
श्य

भूताः जाताइत्यर्थः॥इच्छाज्ञानक्रियाशक्तीनाः चत्तस्रः शक्तयः॥उत्तरावयवाः॥ऊर्ध्वमुखत्रिकोणचतुष्टयस्वरूपाः॥अयंभावः॥पराविलसनरूपाएताः पंचदशीवामाज्येष्ठारौद्र्यंबिकाः इच्छाज्ञानक्रियाशक्तीनास्तथोत्तरावयवाश्चेति॥एतच्चक्रिनवकमयनवयोनिकोणचक्रमिति॥एतच्छ्रुत्यर्थः॥आत्मानंस्फुरणंपश्येद्यथासापरमाकलाइत्यारभ्यवैखरीविश्वविग्रहेत्यंतेनसम्यङ्निरूपितं॥तत्तएवअवधार्यं॥व्यस्ताव्यस्तदर्शहृयं॥व्यस्तंव्यष्टिरूपं॥अव्यस्तंसमष्टिरूपं॥सकर्त्रीपानपात्रसिद्धं॥अर्शहृयं॥सहस्रान्यायेनअखिलाँल्लकमंत्रमयप्रकाशविमर्शरूपपूर्णाहं ४२८
तामाबगर्भकमकलात्मकंविद्धीत्यर्थः॥अत्रेदंपूर्णाहंतामयपरब्रह्मपत्नीविशिष्टमेवसकलकार्यनिर्वाहकमिति॥सर्वागमसिद्धं॥तथाबृहदारण्यके॥आत्मैवेदमग्रआसीत्॥पुरुषविधः॥सोवीक्ष्यनान्यदात्मनोपश्यत्सोहमस्मीत्यग्रेव्याहरत्ततोऽहंनामोऽभवत्॥तस्माद्यद्येतर्ह्यामंत्रितोहमयमित्येवाग्रऊक्त्वान्यंनामप्रब्रूतइत्युपक्रम्यपूर्णाहंतामयंपरब्रह्मस्वरूपंदिव्यरूप ३९

तीरूपत्वेनास्थायसर्वंतत्रनिर्मात्रविधोनतदुक्तं॥उपरितननवाक्येनसमाप्यते॥तथाहि॥सतपोतप्यतेसर्वंसृष्ट्वेदंयदिदंकिंचेतिसृष्ट्वेदंसर्वंसृष्ट्वायत्तत्सत्यमित्युच्यतेसोसौपरमात्मेतिपदाभ्यांतदेवसत्यंब्रह्मप्रतीयतइति॥एवंसंतंदर्शयद्भयं॥एकादशात्मसंहृत्यविचार्यमाणेएकादशविधंभवतीत्यर्थः॥परादिईशांतांतेशक्तिदशकंव्यष्टिरूपं॥सर्वंसमष्टिरूपत्वेनचैकं॥तेनचैकादशात्मकमिदंबिंदुतत्त्वमेवपश्यंतिशक्तिःकारणं॥सर्वंखल्विदंब्रह्मतज्जलानितिशांतउपासनवत्॥कार्यकारणयोरभेदव्यपदेशः॥इतःपरंवसुकोलेषुदशादिसृष्टिप्रकारंअभिधातुःपरमप्रकृतित्रिकोणचक्रक्रमंनिगमयति॥२४॥एवंकामकलात्मत्रिबिंदुतत्त्वरूपवर्णमयी॥सेयं

त्रिकोणरूपंयानात्रिगुणस्वरूपिणीमाता॥२५॥एकापरेति॥एवंपूर्वोक्तप्रकारेणकामकलात्मा
कामःप्रकाशैकस्वभावेनुत्तराक्षरात्मापरमःशिवः॥कलात्रिखिलवर्णोस्यपरमहाक्षरमयीवि
मर्शीविग्रहः॥एतदुभयात्मकत्वंनामस्वाभाविकपरिपूर्णाहंभावशालित्वं॥एतच्चबिंदुरहंकारा
त्मेत्यत्रस्पष्टमभ्यधायि॥एवंरूपाकामकलात्मा॥त्रिबिंदुनत्वस्वरूपवर्णमयीत्रिबिंदवःपूर्वोक्त
रक्तेशुक्लेमिश्रात्मनः॥तेषांस्वभावः॥नत्वंतत्स्वरूपा येवर्णाःवाग्भवादयः॥तेदार्शनिकाःत
थारहस्यान्नाये॥बिंदुत्रयात्मकंस्वात्मशृंगाटंविधिसुंदरं॥मिश्रंशुक्लेचरक्तेचपुरोगंप्रण
वात्मकं॥रेखात्रयावगंतव्यंसंवित्सांद्रोत्रिवात्मकं॥रक्तमस्यनिराचारमवशिष्टंनत्तःप्रि
यं॥तयोर्मिश्रंतुसंयोगेनिर्वाणंनिर्मलंपरं॥चतुरस्रात्मं॥कूटत्रयात्मिकांदेवींसमष्टिव्यष्टिरूपिणी
आद्यांशक्तिंभावयंतोभावार्थमितिमन्यते॥सेयंत्रिकोणरूपमापन्ना॥चिदानंदघनपरमार्थसक ४०

लाम्नायसारभूता॥इयंविश्वाहंभावभावनाशालिभिःमहायोगिवर्यैरात्मसाक्षित्वेनानुभूयमानाः
त्रिगुणाः॥इच्छाज्ञानक्रियामायाशक्तिमयाएव॥तथाप्रत्यभिज्ञायां॥सांगरूपेषुतत्त्वेष्वित्यादि॥
इच्छाज्ञानक्रियामायात्रितयएवगुणाःसत्वरजस्तमइति॥अतएवसर्वेजगन्निर्मात्रिएका॥आत्मावाए
वाग्रआसीत्॥इतिश्रुत्युक्तरीत्यासर्वतत्वातीतापराशक्तिः॥त्रिकोणरूपं॥अनुत्तरानंदेच्छासंघट्टस्त्रि
कोणमित्यभियुक्तोक्तरीत्यासर्वसिद्धिप्रदायकंनिरहस्यश्रीत्रिकोणचक्रं॥तन्मयीजाने
त्यर्थः॥तथावचनं॥अनुत्तरानंदचितिरिच्छाशक्तोनियोजिता॥त्रिकोणमितितत्साहुर्निसर्गा
मोदसुंदरमिति॥इतःपरंविलसनरूपायाःपरंत्र्यंत्र्याद्याअपिनवयोनिचक्रात्मनानवात्मक
त्वमाह॥तदन्यावामादिव्यष्टिमातृरूपात्मा॥तेननवात्माज्ञाता॥मानेति॥तदस्यापराविद्या
सभूतापरंत्र्यंत्रीवामादिव्यष्टिमातृरूपात्मा॥वामादिरांतांतत्रशक्तिनवकमयीयतः॥तेनकार

रोनसामातापरयंतीनामजननी॥नवात्मावामादिशक्तांतशक्तिकदंबकाविर्भावकारणनव
योनिचक्रात्मिकाजाप्रादुर्भूतेत्यर्थः॥अत्रवामादिशक्तिलक्षणंप्रसंगात्किंदिदुच्यते॥
तत्रवामानामस्वांतस्थितप्रपंचवमनोद्विश्वजनयित्रीत्यभिधीयते॥ज्येष्ठासर्वमंगळकारिणी
रौद्रीसर्वरोगविद्राविणीसमस्तेष्टप्रदाशक्तिः॥तथायथागमश्च॥वामाविश्वस्यवमनाज्ये
ष्ठाश्रीवमयीयतः॥द्रावयित्रीरुजंरौद्रीदोग्ध्रीचारिवलकर्मणामिति॥अंबिकाचसास्फुरत्ता
हासनेनिप्रत्यभिज्ञास्थितासर्वानिष्ठायोपरिस्फुरीरूपमापन्नापराकूस्मुद्रीरिता॥इच्छा
नक्रियाशक्तयस्तुपरयंतीमध्यमावैखरीरूपाइतिप्रपंचिता॥चतुश्शक्त्या॥इच्छाशक्तिस्तथा
सेयंपरयंतीवपुषास्थिताइत्यादिनाशांताचनिष्कलंनिष्क्रियंशांतमित्यादिश्लोकानिरंकु
शाचिन्मयशक्तिः॥तथाव्याचष्टे॥भगवानमृतानंदनाथः॥निरंकुशोनादबिंदूचेत्यत्रनि ४१

रंकुशाशांताशक्तिः॥शांतायानिरंकुशाचिद्रूपात्वादिति॥अनंतरंमध्यमायाअपिप्रकारांतरेण
नवात्मकत्वंब्रुवते॥मध्यमाभिधानाभ्यां॥द्विविधाहिमध्यमासूक्ष्मास्थूलाकीर्तिताबुधैः॥नव
नादमयीस्थूलानवदुर्गात्माचभवतिधारेव्या॥२६॥आद्याकारणमन्याकार्यंयतस्ततोहेतोः॥से
वेयंनहिभेदःस्यादास्यंहेतुमद्भवेष्टं॥२७॥मध्यमापरापरयंत्योःसमरसावस्था॥अभि
धानाभ्यांनामधेयाभ्यांसाअंतर्मुखपरबोधमयोगीदृश्यं॥मध्यमानामशक्तिर्द्विविधाद्वि
प्रकारास्थूलसूक्ष्मभावात्॥तत्रसूक्ष्मासमाधिबलेनअनुभूयमानाश्रीस्थूलाकुंडलिनीपामरादिवत्लजनयोग्यवर्ण्यास्थितासर्वधावर्तमानाएतद्देवव्याचष्टे॥सूक्ष्मानव
नादमयीस्थूलनववर्णात्माइति॥अयमर्थः॥मित्रावरणसदनात्॥वायुनिरोधनेनस्वा
दिष्ठानादिकमलभेदसुरस्मरंद्वादशनारविंदासनस्थपरमस्त्रीवांकसुपसर्पनी॥म

हामाहकाकुंडलिनीबहुविधनादात्मिकायाअनुभूयतेसमाधिगतसर्वार्थः महामाहेश्वरैः त्वा
त्मलेनमन्यते॥नवनादमयीनि॥तथाचपरमहंसोपनिषत्॥यथाअथहंसपरमहंसनिर्णयं
व्याख्यास्यामोब्रह्मणारिरोवेदांतायगुरुभक्तायहंसहंसेत्यादिना॥परमहंसपरब्रह्मनिर्दि
श्यपुनरपितदुपासनंविस्तरेणनिष्ठि॥गुदमवष्टभ्याधाराद्वायुमुत्थाप्यस्वाधिष्ठानंत्रिःप्रदक्षिणीकृ
त्यमणिपूरकंगत्वानाहतमतिक्रम्यविशुद्धौप्राणान्निरुध्यआज्ञामनुधावन्ब्रह्मरंध्रं
विशिष्ट यन्इत्यादिब्रह्मरंध्रेध्यानंमुक्तापुनरपिमूलाधारब्रह्मरंध्रपर्यंतंव्यापिन्याःमूलकुंडलिन्याः
स्वरूपंनादात्मकमितिव्याचष्टेयथाहंसोविलीनोभवतियथानादमाधाराद्ब्रह्मरंध्रपर्यं
तंशुद्धस्फटिकसंकाशंसर्वब्रह्मपरमोसेत्युच्यते॥इत्यादितदुपासनांगजालोनिरूपन्य
स्यते॥चिरिणिप्रथमः॥चिरिणिचिरणीतिद्वितीयः॥घंटानादस्तृतीयः॥शंखनादः ४२

चतुर्थः॥पंचमस्तंत्रीनादः॥षष्ठस्तालनादः॥सप्तमोवेणुनादः॥अष्टमोभेरीनादः॥नवमोमृदं
गनादः॥दशमोमेघनादः नवमंपरित्यज्यदशमेवाभ्यसेत्॥तस्मान्मनोविलीनेमनसिग
तसंकल्पेविकल्पेदग्धेसतिवोहमिति॥परमहंसोपनिषत्॥मूलाधारदग्धेसतिवोहमिति॥पर
महंसोपनिषत्॥मूलाधारेमाहेश्वरीमित्यादिनाचरेदधिगोचरइत्यंतंनक्षगात्सालुलुकचटतप
षात्मिका॥स्वरव्यवहारविषयिणीत्युच्यते॥यथाश्रीतंत्रसद्भावेव्यासानुमाहकालोकेपरतेजस्सम
न्वितो॥तयाव्याप्तमिदंसर्वंब्रह्मभुवनांतरं॥तत्रस्थश्चयदानादोव्यापिनश्चानुरार्चिता॥अवर्ण
स्तोयथावर्णःस्थितःसर्वगतःप्रिये॥तथाहंकथयिष्यामिनिर्णयार्थःस्फुटंतवेत्यारभ्य॥यासा
शक्तिःपरासूक्ष्मानिराकारेतिकीर्तिताहृद्विंदुवेष्टयित्वातुसुषुप्ताभुजगीकृतिः॥तत्रसुसोम
हाभोगिनकिंचिन्मन्यतेअमी॥चंद्रार्कानलनक्षत्रैर्भुवनानिचतुर्दशक्षीणेतुसोदेवि

विषस्रद्वदनांगना॥प्रबुध्यासानिनादेनवरणध्वानरूपिणी॥मधेनाचोदरस्तेनबंधनादववर्णिना॥तावेद्वे
भ्रमयोगेनामथनंत्रकिंविग्रहे॥भेदानुप्रथमोत्पंनाविंदुनादद्वयीभिन्नासमुद्भिन्नानेनकालस्रक्ष्मा यथा
नुकुंडली चनुष्कलमयीबिंदुःस्तुचैभरप्रभुः॥मध्यमंथनयोगेनरजुत्वंजायतेप्रिये॥ज्येष्ठा
रुद्रिस्तासानुविंदुद्वयसुमध्यमा॥विंदुनादत्वमायातोकेहिद्वतकुंडली॥केकीनामसा
ज्ञेयाउभौबिंदुयथागतौत्रिपदासासमाख्याताशैद्रीनाम्नातुगीयते॥रोधिनीसासमुद्दिष्टामो
क्षमार्गनिरोधनात्॥त्रांकत्रंकलाकारंअंबिकाचार्धचंद्रिकाएकैवेयंपराशक्तिस्त्रिधा
सानुप्रजायते॥आभ्योयुक्ताविविक्ताभ्यांसजातोनववर्गतः॥नवनाथास्तासानुनव
गोपलक्ष्येतेनिगद्यते॥अत्रकेचित्सूक्ष्मास्थूलाकृतिस्थिरेतिपाठंकल्पयित्वासूक्ष्मास्थिरास्थू
लानवनादमयीत्याहुः॥एवंचसतिनववर्गोपदानन्वयुः॥संप्रदायनिरोधश्चासानुस्वबुध्यो ४३

संप्रदायमजानानएवमर्थमाहुः॥तस्मादस्मदुक्तार्थस्यतदुक्तार्थस्यचोचितसदार्थीवेद्योषश्लेर्विद्वद्भिरेव
ज्ञातव्यमित्यलंप्रेक्षावतिप्यारब्धानाश्वेतिलिपयश्चअत्रलिपीनांभूतत्वंतेष्वविपरीतसा
भिश्लंगतत्वंकल्पनामात्रमेव॥अक्षराणांतेजोरूपत्वात्मकत्वात्॥तथाचआगमः॥यासानुमा
तृकालोकेपरेतेजसमन्विते॥सर्ववर्णात्मिकामंत्रातेचत्रातेत्मिकाःप्रिये॥इत्यादि॥तेषामाख्या
या भिधौस्यातांतत्रभांतिलिप्येतिकश्चिद्वानाचष्टे॥नतुछंदोभंगादनुपपन्नमित्यनादरणीयम्
सूक्ष्मरूपाहिमध्यमानंस्थूलरूपायाःकारणभावमापन्नएकैवेयंतआह॥३७॥आद्याकारणमन्यो
कार्यंयतस्ततोहेतोः॥सैवेयंनहिभेदस्तादात्म्यंहेतुहेतुमद्भीष्टमितिगद्यते॥आद्यापरोक्तसूक्ष्माका
रणंप्रथमोद्भूतत्वात्॥अन्यास्थूलेकार्यंतज्जन्यत्वात्कार्यंयतस्ततस्मात्कारणात्॥अनयोःसू
क्ष्मस्थूलयोःकार्यकारणयोर्भावः॥ततोहेतोःतेकर्मकारणेनद्वयंस्थूलासैवसूक्ष्मारा

क्तिरेवनहिभेदः भेदोनास्त्येव॥ननुकथमभेदेकार्यकारणभावइत्यत्राह॥तादात्म्यहेतुहेतुम
दभीष्टमिति॥ तादात्म्यंभेदोहिभेदरूपंहेतुहेतुमद्भीष्टंतज्जन्यजनकरूपवत्तद्दृष्टं॥ष्टुट
वत्॥वाचारंभणमात्रत्वात्एकमेववस्तुउभयविधंभवति॥सर्ववेदांतसंमतमित्यर्थः॥अनं
तरंमध्यशृंगाटनेजःप्रसरणात्मकवसुकोणादिचक्रनिरूपणद्वारदेवीश्वर्याविर्भाव
माह॥त्रिषसप्तवर्णमयंतद्वसुकोणंसर्वरोहगहरारव्यंचक्रंत्रिषसप्तवर्णमयं॥त्रिषसप्तवर्णा
ष्टकोणंमध्यकोणस्यविस्तारोविकासभेदः॥तत्तादृग्भध्यंचवेदवारव्यंसंहत्यदृक्के
अस्मिन्त्रिकोणवसुकोणरूपंचिद्रूपदीपकेदेदासनसंरूढसंवर्त्तनवर्त्तिचिद्वर्तिमित्यु
क्तरीत्याविंदुचक्राधिरूढायास्तेजोरश्मेस्त्रिपुरायाःप्रभा[redacted]पटलप्रकाशेनेत्यर्थः॥
तथायाद्वितीयमिदं॥तस्याःसर्वोत्कृष्टतेजोराजद्विभवस्यचक्त्रितयस्यछायायाद्वितयं

कांतिद्वितयंसर्वरक्षाकरसर्वार्थसाधकाभिदचक्रद्वयात्मनापरिणतमित्यर्थः॥तथाचोक्तं
नवत्रिकोणस्फुरितप्रभारूपरहस्यकमिति॥तच्चक्रद्वयस्वरूपंव्याचष्टे॥तटचक्रवर्ग
चतुष्टयविलसनविस्फुटकोणविस्तारइति॥तवर्गटवर्गात्साक्षरदक्षाक्षरूपमंतर्दशारंचवर्गक
र्गात्साक्षरदक्षाक्षरूपंबहिर्दशारमित्यर्थः॥एतच्चक्रचतुष्कप्रभासमेतंदक्षाकोणपरिणा
मः॥एतच्चक्रचतुष्कस्यबिंदुत्रिकोणवसुकोणांतर्दशारात्मकचक्रचतुष्कस्यप्रभाकांतेः
तस्यासमेतंसंयुक्तंदशारपरिणामःबहिर्दशारचक्रमितियावत्॥बहिर्दशारचक्रस्यै
वादिचक्रचतुष्टयसन्निधानादेवतात्पर्यतस्तत्प्राप्तीतीत्यर्थः॥तथोक्तं॥चतुश्चक्रप्र
भारूपसंयुक्तपरिणामतइति॥अथवाएतच्चक्रचतुष्कस्यत्रिकोणवसुकोणदशारद्व
यरूपस्यतदेवाह॥आदिस्वरनवकचतुर्दशवर्णमयंचतुर्दशारमिति॥अकारादिचतुर्दश

वर्णात्मकचतुर्दशकोणसहितं सर्वसौभाग्यदायकाभिधचक्रमित्यर्थः॥ एवं वैंदवादिभुवनो
णपर्यंतचक्रवर्णनद्वारा वैखरीशक्तिरविर्भूतइत्याह॥ २९॥ परापश्यंत्यादिमध्यम
यास्थूलवर्णरूपिण्या॥ एताभिरेकपंचाशद्वर्णात्मा वैखरी जाता॥ परादिशक्तिलक्ष
णं चपूर्वमेववहुधाप्रपंचितं॥ अयमर्थः॥ आदिक्षांतास्वरव्यक्तिमयात्रिखलप्रपंचनिर्मात्रि
सर्वशब्दात्मिकावैखरीति॥ तथाचोक्तं॥ वैखरीविश्वविग्रहेति॥ वाचावाक्येककरण
विशब्दांवैखरींचप्रतिपद्यतइत्यादि॥ इतः परंसर्वसंक्षोभणस्वरागपरिवारका
भिधचक्रद्वयंवैखरीवर्णात्मकमेवेत्याह॥ कादिभिरष्टभिरुपचितमष्टदलाब्जं च
वैखरीवर्णैः॥ स्वरगणसमुदितमेतद्यष्टदलांभोरुहंचसंचिंत्य॥ ३०॥ वैखरीवर्णैः वैखरी
शक्तिस्वरूपैः॥ अष्टभिः कादिभिरुपचितं सम्यक्प्रोतंअष्टदलाब्जंचसर्वसंक्षोभणच ४५

क्रांतस्वरगणसमुदितंस्वरगणैरकारादिषोडशवर्णैः समुदितंसम्यग्भावितंएतत्परिवृत्त्यमा
नाद्यष्टदलांभोरुहंसर्वराग परिवारकचक्रंसंचिंत्यसर्वत्राभावनीयमित्यर्थः॥ ३१॥ बिंदुत्रय
मयेतज्जस्त्रितयविकारंचतानिरत्नानि॥ भ्रूबिंदुत्रयमेतत्त्रयंत्यादित्रिमात्रविश्रांतिः॥ ३२॥तानि
रत्नानिमन्त्रस्योपरिअष्टदलपद्मोपरिषोडशदलपद्मोपरिचस्थितानिबिंदुत्रयंसर्वोत्करुत्कुक्षि
श्चात्मकंतन्मयंयत्तेजस्त्रितयंसोमसूर्याग्निरूपंतद्विकासस्तन्मयानित्यर्थः॥ तत्ररत्नत्रयस्यते
जस्त्रितयात्मकत्वकथनेनसोमसूर्यानलत्रिखंडमयत्वंचक्रस्योक्तं॥ यथागमः॥ त्रिखंडमा
तृकाचक्रंसोमसूर्यानलात्मकमितिं॥ सुभगोदयेसोमसूर्यकलान्वात्मानेजस्त्रितयरूपकं
नेत्रत्रयंभावयामिरत्नत्रितयंजसा॥ तद्विकोरश्चरत्नानिरत्नानि॥ वेदाःप्रमाणमितिवद्दृष्ट
व्यं॥ भ्रूबिंदुत्रयं॥ अणिमादिसिद्धयः ह्रीं इत्यादिसर्वसंक्षोभिण्यादिशक्तिकदंबकात्मनश्चतुरस्रत्रयं

स्यादित्रिमानविश्रांतिः पश्यंती मध्यमा वैखरी त्राकृयः॥ एतावत्पर्यंतश्रीचक्रासनाचकासनइत्यर्थः
एतच्चआसनंपश्येचदासापरमाकला॥इत्यारभ्यवैखरीविश्वविग्रहेत्यंतेनग्रंथजालेनसम्य
निर्णयी॥ एवंमध्यंचक्रस्यस्यादित्युपक्रम्यपश्यंत्यादित्रिमानविश्रांतिरित्यंतंश्रीमहात्रि
पुरसुंदर्याःचक्रंसंम्यक्निरूप्यअनंतरंतदावरणचक्रांतर्गतत्राक्तिनिकुरंबंतन्निकटस्थंत
श्रीगुरुमंडलमपिश्रीसुरमंडलदेव्यवयवपरिणतिरूपमेवेत्याह॥३२॥क्रमएषांपदविक्षे
पःक्रमोदयःकथ्यतेद्विधा॥आवरणंगुरुपंक्तिर्हृयमिदंमंत्रोपादेयुजःप्रसरं॥३३॥इत्यादि
अरिणाभूयोस्यानूत्यंतंक्रमएषपदक्रमःसचद्विविधःपदविक्षेपरूपःक्रमोदयरूपश्च
तत्रपदविक्षेपोनामसुंदर्याअनंतकोटिकिरणसिकानंतत्राक्तिजननसामर्थ्यं॥तथाचो
पनिषत्॥मरीचयःस्वयंसुवाःयेत्रारिणयुक्कल्पयन्तित्यादिनामेवभांतमनुभांतिसर्वमि ४६

कारणं

स्यादि॥यथागमश्च॥ज्योतिरूपापरोयस्यादेहोद्भवाअपिश्चवे॥किरणाश्चसहस्रंचद्विसहस्रंचल
क्षकं॥कोटिरर्बुदमेतेषांपरासंख्यानविद्यते॥तामेकानुप्रविश्येवभांतिसर्वंचराचरं॥यस्या
देव्यामहेशानिभासासर्वंविभात्यते॥तद्भावरहितःकिंचिन्नचद्वाप्रकाशते॥तस्याश्चित्रीवशक्तेये
श्चिद्रूपायाश्चितंविना॥भाद्यमापद्यतेनूनंजगदेतच्चराचरं॥तेषामनंतकोटीनांमरी
चीनांमहेश्वरि॥मध्येषष्ठ्यंतरंदेवित्रातुःकिरणःस्त्रियै॥ब्रह्मांडंभासयत्येतेपिंडांडम
पिपार्वति॥इत्यादि॥सर्वपीठनिवासिन्यःसर्वगाश्चिन्मरीचयः॥इत्यादि॥रश्मिरूपजनवे
तोभक्तिनम्रःप्रजायेत्॥इत्यमृतानंदाः॥क्रमोदयोनामदिव्यसिद्धमानीचरूपाअनंत
प्रकाशात्मकश्रीगुरुमंडलात्मकतयाप्रसरणं॥तरहस्याम्नाये॥चरणहृयचंद्रार्कश्म
योरुरवःकिलेति॥एतच्चोत्तरत्रप्रपंचने॥एतदेवक्रमहृयंविवरणेति॥आवरणंआव

रणास्थितत्रात्मनिकुरुंबंमंचाः क्रोडांतीतिवत्॥गुरुपंक्तिः॥गुरुमंडलं॥इदंहृदयं॥अंबापादांबु
जप्रसरणंअंबायाःत्रिपुरायाःपदांबुजस्यश्रीपादयुगलस्यप्रसरः॥प्रसरणंविजृंभणं
मितियावत्॥यच्छक्तिः॥ज्योतिष्पद्मजन्मानंमहत्स्वादित्यादि॥तथाप्रामाणिकवचनं॥अ
नेककोटिभेदैस्तुगतिनंत्रिपुरंमहः॥तत्त्वमध्येपरादेवीसामहात्रिपुरसुंदरी॥षड्वक्त्रांभवे
वरदाभयहस्तांश्चसर्वदामार्थविग्रहाः॥तेजोमयाश्रेयापूराध्येयाःकेवलंमोक्षकांक्षि
भिः॥तत्सारप्रसरणंक्रमतोविहरणंति॥३३॥सेयंपरामहेश्वीचक्राकारेणपरिणमतेय
दा॥तदेहावयवानांपरिणतिरावरणदेवताः सर्वाः॥३४॥आसीनाविद्रुमरथचक्रेत्रिपु
रसुंदरीदेवी॥कामेश्वरांकनिलयाकलयाचंद्रस्यकल्पितोनंसा॥३५॥पात्रांकुरेक्षुच
पप्रसूनशरपंचकांचितस्वकरा॥बालारुणानवघोणीरक्तिभानुकरानुलोचनत्रि

MEMORIAL

नयोनिः॥सेयंअपरिच्छिन्नाअनंततेजोराशिमयी॥परासर्वोत्कृष्टाअनंतकोटियोगिनीवंद्य
समाराधितनित्यनिरवधिकानंदमयात्मसाम्राज्यसंपदभिमानरागलीलीलयच्छक्तिः
यनोक्तचक्रस्यादितथाचोक्तं॥चतुःषष्टियुताःकोट्योयोगिनींतामहोजसां॥चक्रेतेक
समाभिख्यसंस्थितावंदितेतिः॥ललितायाव्याख्याने॥वाचामगोचरेमगोचरवाग्भवु
षेविद्महेतयासकललीयमनन्यतुल्यं॥त्रैलोक्यगर्भपरिसरितत्रात्मिचक्रसाम्राज्यस
पदभिमानमभिस्पृशंतीति॥चक्राकारेणचक्रंनवात्मकमिदंनवधाभिन्नमंत्रकामि
तिवेदंवादित्रैलोक्यप्रोहनादिचक्रंनवात्मनास्फुरत्तामात्मनः॥पश्येदितिहर्षानंदम
यात्मावलोकनसमयेपरिणतेमेनअकारांतरमावहितपार्थनायदिमात्रंप्रपंचप्रादुर्भा
वस्यप्रार्थनाविषयत्वात्ब्रह्मणःपरिणामःसृष्टयेवाभिधीयतेयथासोकामयतबहु

MEMORIAL

कुस्यांप्रजोयेयेनि॥सृष्टिं प्रस्तुत्यंतत्सृष्ट्वातदेवानुप्राविशत्॥तदनुप्रविश्यस्मृतिश्च॥
अस्यांपरिणतायामित्यादि॥तद्देहावयवानांतस्यास्त्रिपुरसुंदर्याःदेहःतेजःपुंजात्म
कःतस्यावयवाःकिरणाःतेषांपरिणतिरवस्थांतरापत्तिरिहावरणदेवता॥वशिन्याद्य
रिणमाद्यनंतरशक्तिनिकुरंबचिदानंदसमुद्भात्मकमेवसमकालंकेनचिदुद्भूतरंगादिवद्
नंतकोटिब्रह्मरुद्रादिभावतिरोभावौभजंतइत्यर्थः॥तथाचोपनिषत्॥यस्मिन्भा
वाःप्रलीयंतेलीनाश्चव्यक्तांयायुःपुनश्चव्यक्तांभवोजायतेबुद्बुदाइति॥चतुस्रा
स्रांचएवंरूपंपरंतेजःश्रीचक्रवपुषास्थितं॥तदीयरश्मिनिकरस्फुरद्भिसमाहतभि
न्नि॥सुभगोदयवासनायामपि॥चक्रराजेपरामत्रयंयोगिप्रकटादिकाः॥विमर्शरूपंचि
दंभोधिलहरीस्थामपिक्रमात्॥यस्याऽल्पसिताएतायोगिन्यःश्वित्तुनिष्ठः॥तेके ४८

श्वरेभजामेताःचक्रंचक्रंसमाश्रिताइति॥वशिन्याद्यावरणशक्तिस्वरूपवर्णनप्रारंभमानः
तदादौमूलदेवीस्वरूपमाह॥आसीनेत्यादि॥बिंदुभेयसर्वानंदमयाख्येपरमाकाशे॥बैंदवेपरमा
काशेइत्युक्तवान्॥चक्रेआत्मसंक्रमणविहारार्हपीठे॥तथाहस्योपनिषदि॥यदेषाचक्रेमनश्च
क्रमभवदितिं॥आसीनाऽऽपरिप्रदेशेविराजमानां॥साहैकालाकारानवधिन्नानंतस्वरूपि
णीत्रिपुरसुंदरीसर्वकारणत्वेनस्फुरणीयस्वभावाकामेश्वरीकामेश्वरस्यश्रीनाथस्य
अंकंवामोरुतलोभागःनिलयोवस्थानंयस्यासातथोक्तं॥परमशिवेनकालविधापराशक्तिः
श्रीचक्राकाररूपिणी॥तन्मध्येबैंदवंस्थानंतत्रास्तेपरमेश्वरी॥सदाशिवेनसंयुक्तासर्वतंत्रार्थ
तासनि॥इति॥अन्यत्रच॥विश्वाकाराप्रभाधारनिजरूपप्रकाशकं॥कामेश्वरंकपूर्यंकनिवि
ष्टमनिसुंदरमिति॥श्रीनाथानंदश्च॥आदिश्रीगुरुनाथस्यवामोरौपरिसंस्थिता॥देवीविश्व

स्रजानादिव्यापारादिविनोदिनी॥चंद्रस्यकलयाकल्पितोनंसा॥अत्रकल्पितपदेनचंद्रमंडलस्य
भगवतीविलोपकरणंलक्ष्यते॥३८॥पाशांकुशेक्षुकोदंडपंचबाणधापप्रसूनशरपंचकां
चितस्वकरा॥पाशस्यासभेदबंधनभूतेघाशक्तिस्वरूपः॥अंकुशःस्वरूपभेदछेदनोपाया
त्मकज्ञानशक्तिमयः॥३७॥इक्षुधापइक्षुपंचकेषुस्वभिन्नाकारवर्जितधनुःक्रियाशक्तिस्व
स्वरूपे॥अमर्थः॥इघाज्ञानक्रियाशक्तयष्टवृतराधेयापाशादिस्वरूपमापन्नाः॥तदुपास
नमाचरंतीत्यर्थः॥तु धाचतुरश्रास्यां॥इघाशक्तिमयंपाशंअंकुशंज्ञानरूपिणी॥क्रियाशा
क्तिमयेबाणधनुषीरधदुश्चलीमिति॥सुभगोदयवासनायामपि॥ध्याःसंचित्स्वनंताया
भेदानलेहुकाः॥आयुधारव्यापराशक्तिः बाणाघाः पूजयाम्यहं॥इत्यादि॥बालारुण
नवद्यागीउदादित्यसंकाशं॥शशिभानुकरानुलोचनंत्रितया॥सोमसूर्याग्निमयंत्रि ४९

नयनं॥तथाचोक्तं॥बालार्कमंडलाभासांचतुर्बाहुंत्रिलोचनां॥पाशांकुशधनुर्बाणधारयं
तींस्त्रिकोंभजे॥इति॥एतदेवमिथुनंगुणाभेदेदृश्यसिध्यादिभावितं॥अविशेषभेद
भिन्नागुरुमंडलस्वरूपमुपहंत्याः॥३८॥तन्मिथुनगुणभेदादस्तिकिंदुतयासकेन्य
स्तोकामेशमिथेशप्रसूरवहंत्रयात्मनाविनतं॥३९॥इतितन्मिथुनंतत्स्वकीतित्वेनस
र्वोपनिषत्सिद्धं॥मिथुनंकोमकामेश्वरीमयंअयमर्थः॥परमात्मादिस्वात्मनमेव
श्रीपुंसमयंलक्षणमिथुनरूपमापन्नोविहरते॥अत्रश्रुतिः॥सवैनैवेमेनस्मादेकाकिनर
मेतनहितीयमैछत्सहेनाबानास॥यद्वा॥श्रीपुंसोसंपरिष्वक्तो॥सइदमेवात्मानंद्वि
धापातयत्॥ततःपतीनिश्चाश्वपत्नीचाभवतामित्यारभ्ययदिदंकिंचमिथुनमापिपी
लिकाभ्यःससर्वंसृजतित्यंतेनमिथुनात्मनाविहरणंश्रीलंब्रह्मत्योह॥तथारहस्यागमश्च

णुरुत्रिष्यपदेस्थित्वास्वयमेवसदाशिवः॥इत्यादिप्रकाशविमर्शात्मनामिथुनीभूतः॥पर
मशिवेएवसकलतंत्रसमवतारयन्नित्यनआह॥एवंतन्मिथुनंकामकामेश्वरीश्रीम
दूर्ध्वरीपनाथवज्रेश्वरीज्येष्ठदेवंनोथेभगमालिनीमित्रनाथः एवमादिमिथुनत्रया
त्मनादिव्यसिध्यमानोघादिक्रमेरूपेणवितनं॥मिथुनत्रयविस्मयंविस्मृतमित्य
र्थः॥एतेचआसीनाश्रीपीठेकृतयुगकालेगुरुःत्रिवीविद्यां॥इत्यत्रसंम्यक्पंचयि
ष्यामि॥रहस्योपनिषदिचायमर्थः सम्यङ्निरूपितः॥यथामध्येचक्रेबिंदुःबिंदोरपं
चोलोकः लोकदेहः सनादरूपः अर्थात्मिकात्रिशक्तिः॥चक्रतनुः॥बिंदुःप्राणःमध्येत्रा
शक्तिरितिसप्रपंचोगुणः॥गुणोलिंगस्वयंभुवादिभेदेनत्रिधाभूतंत्रिलिंगलिंगि ५०
नंजयदंकामकामरूपं॥केवल्यओड्याणंजयदंआतंधरंयस्तुरुषादेवस्यास्मि

कांभवति॥अत्रेदंव्याख्यास्यामः॥यदिदंनीलकंठःत्रीमीगर्भीयोवाच॥यतोवाइमानिभूतानिजायं
तेयेनजातानिजीवंतियत्प्रयंत्यभिसंविशंतीति॥पृच्छतीयदिदंद्रष्टयेतत्रानंदयोनिः॥तेने
वजीवेतिति॥तदेषाभुक्ताइत्यादिनात्रिपुराचक्रनिरूपणपुरस्सरंसकलप्रपंचानांत्रिपु
राएवसकाशादुत्पत्तिजीवनलयाःप्रतिपाद्यंते॥तत्तश्चसर्वंफलदायिनीत्रिपुरैव॥श्री
देवित्वरूपैःवीरैःभोजनीयेतिउक्तंभवति॥तथारहस्यागमश्च॥यस्यनोपरिमंजन्मयदि
वाशंकरस्वयं॥तेनैवलभ्यतेविद्याश्रीमत्पंचदशाक्षरी॥इतःपरंआवरणदेवतायाःस्व
रूपमाहोवर्णयति॥३॥वसुकोणनिवासिन्योयास्ताःसंध्यासुताबत्रिन्योघाः॥पुर्य
एकमेवेदंचक्रतनोःसंविदात्मनोदेव्याइति॥३॥वसुकोणनिवासिन्यःसर्वरोगहरा
रव्यचक्रनिवासनदीलायाःवेत्रिन्याघश्रीचक्रयोगाःसृष्टिंभावदानसमर्थाः॥कथंअ

त्र रोगो हरेन्नित्यं सरणीहं भावप्रदत्वमेव अरणी मरत्यनाव्याधिः कार्यरणेकनिधानम्
रिसुकैः॥सर्वरोगहरएतावित्यादिविशेषनः॥इत्यभियुक्तनयोक्तिश्च॥एवं भूतास्ता
संध्यारुणाः अरुणाकारभासंतइत्यर्थः॥अतएवेदमष्टकोणचक्रं संविदात्मनः संवि
देवात्मनः स्वरूपं यस्याःसा॥सत्यंज्ञानमनंतंब्रह्मेतिश्रुतेः॥स्वसंवित्रिपुरादेवी त्याग
मश्वोदेव्याः बहुस्यामितिविहरणस्वभावायाः चक्रंननोः चक्रात्मिकायाः सूक्ष्मशरीर
मित्यर्थः॥तथाचोक्तं॥चित्तिः चितंचचेतन्यंचेतनाहृयुकर्मच॥जीवः कलाशरीरंच
सूक्ष्मपुर्यष्टकंभवेदिति॥त्रिपादानंदाश्च॥अष्टकोणाप्रवेशोयंचिंतिर्योनेषुसादिकं॥सू
क्ष्मपुर्यष्टकंदेव्यामविशेषमगोरवमिति॥३॥तानिहविषयरूपाणयस्ताः सर्वादिस्वरूपमाप
न्नाः॥अंतर्दशारनिलयालसंनीरारदिंदुसुंदरशोकाराः॥४०॥यद्विषयरूपेयः वसुकोण ५१

निकटवासिन्यः नाः स्वोत्थैक्यरूपरक्षणधारणीत्वेनप्रसिद्धाः॥सर्वशक्तिदशकरूपंप्राप्ताः
अंतर्दशारनिलयाःसर्वरक्षाकरोभिधेयचक्रसमारूढाः॥निगर्भयोनिन्यःशारदिंदुसुंदराकाराः॥स्वप्रकाशच
क्रात्मकतयः॥लसंनिप्रकाशंतेजःतथाचोक्तं॥अंतर्दशारगादेव्योविद्युत्सुंजनिभाःशुभाः॥निगर्भारव्याप
जयाभिसर्वरक्षाविधायिनइति॥४०॥तद्बाह्यपंक्तिकोणेषुयोनिन्यःसर्वसिद्धिदाःप्रोक्ताः॥दैवीधीक
र्मेंद्रियविषयमयाविषयमयाविषदवेषभूषाद्याः॥४१॥तद्बाह्यपंक्तिकोणेषुतस्यसर्वरक्षाक
रचक्रस्यबाह्यभूतेषुऊर्ध्वादिस्थितेषुपंक्तिषुकोणेषुसर्वार्थसाधकचक्रतत्कोणसंकलनस्थि
ताःयोनिन्यःकुलकौलनामधेयाःसर्वसिद्धिदाःपूर्वाः सर्वसिद्धिप्रसूरवादिशक्तयः॥दैवीधीक
र्मेंद्रियविषयमयाः॥देव्याः त्रिपुरायाः॥धीकर्मेंद्रियाणिश्रोत्रादीनिकर्मेंद्रियाणिवाग्दीनितेषां
विषयाः शब्दादयः॥अखिलपदार्थमयाःतत्स्वरूपाः विशदवेषभूषाद्याः विशदाः शुभ्रा

कारः वेषाश्च भूषाश्चेत्येतेषां द्वन्द्वः विग्रहाः॥ अयमर्थः॥ मंत्रदेवतासामेतद्रूपासिद्धिदायिन्यः सुखकृतयः शुभाभरणाः संतर्हिताः॥ तथा चोक्तं चतुरस्रायां॥ श्वेतावराभयकराः श्वेताभरणभूषिताः मंत्राणांस्वप्रमाणरूपयोगादन्वर्थसंज्ञिके॥ सर्वसिद्धिप्रदाचस्तुरन्के सर्वार्थसाधके इति॥ सुभगोदयवासनायां चवाद्यदशारभागेयंकथिकर्मोक्षगोचर इति॥ ४८॥ भुवनारचक्रं भवानादेविभानुकरणविवरण स्फुरणाः॥ संध्यासवर्णवसनाः संचिंत्याहसंप्रदायेयोगिन्यः॥ ४९॥ भुवनारचक्रं सर्वसौभाग्योदाय कंभवनंआवासस्थानंयासांताः देव्याभानुकरणानिचतुर्द्वाकरणानि॥ कर्मेंद्रियाणिपंचज्ञानेंद्रिया णिपंचमनोबुध्यहंकारचित्तान्यंतःकरणानिचत्वारिप्रत्यभिज्ञायांतु॥ त्रयोदशीविधायाश्चवाक्यांनःक रणान्यिलोरिति॥ चित्तिरितिरेकेनत्रयोदशत्वमुक्तं॥ इहतुचित्तेनसाकंचतुर्दशत्वमुक्तं॥ चित्तेमयेश्री पीठइति॥ ७ चित्तस्थापिअयुक्तैरंतःकरणपरिगणनातूक्तेषांविवरणव्याख्यानभूतंस्फुरणंचतु

र्दशारूपंयासांताः॥ देवीतुस्वयमेवचतुर्द्वाकर्त्रीरणात्मकचतुर्द्वारचक्रदेवतात्मनास्थिताइ त्यर्थः॥ तथाचोक्तं॥ त्रिवानरेः चतुर्द्वारसरणिकरणानिचतुर्द्वारात्मकरूपत्रिवारणयाम हादेव्यास्मराम्यहं॥ इतिसंध्यासवर्णसद्वंवसनंवस्त्रंयासांताः संप्रदायेयोगिन्यः आदिश क्तिमयत्वेनसत्संप्रदायवेत्त्र्यः सर्वसंक्षोभणीप्रभृतयः संचिंत्याहसम्यग्भावनीयाततथाचतुः रस्रायां॥ त्रैलोक्यसारमयत्वेनप्रसन्नत्वान्महेश्वरि॥ संप्रदायचक्रमायातां॥ चक्रेसौभाग्यदा यके॥ निरंतरप्रभारूपसौभाग्यबलयोगतः॥ अन्वर्थसंज्ञिकेदेविअरिमासदृशाः शुभाः सर्वसंक्षोभिणीमुख्याः देहेकाश्चिदिवस्थिताः॥ इति॥ ४२॥ अव्यक्तमहदहंकृतितन्मात्रस्त्रीकृतां गनाकाराः॥ हिरण्यगर्भाण्डजयंतिसुव्रतयोगिनीसंज्ञाः॥ ४३॥ अव्यक्तं अव्यक्तारब्धतत्वंम हत्तत्वं महत्तत्वं अहंकृतिरहंकारतत्वं॥ तन्मात्रपृथिव्यादितन्मात्राः॥ पंचसंहत्यअष्टधेरभी

ष्टं स्वीकृतआकारंयासांताःदेव्यास्तकमित्यर्थः॥गुप्तरेतेयोगिनीसंज्ञाः मूलदेव्याः अत्यंतरंग
भूतत्वात्॥एतासांअनंगकुसुमादीनांगुप्ततरयोगिनीसंज्ञेति॥वाग्भवाष्टकंसंबंधस्तूक्ष्मव
र्गः॥स्वरूपतःलोभगुप्ततरश्चान्यःसर्वसंक्षोभणाख्ये॥अनंगकुसुमाद्यास्तुरक्तकंचुकत्रो
भिताःवेणीकृतलसत्केशाश्चापबाणधराःशुभाइति॥त्रिवानंदाश्चवसुच्छदनपद्मोकद
ळोयंचक्रकोविभुः॥अव्यक्ताद्याःप्रकृतयोभूताहंनिश्चितोत्रहंअनंगकुसुमाद्यष्टशक्ते
यःहृद्वसुच्छदनसरोजेसर्वसंक्षोभणाख्याएदळपद्मेजयंतिसर्वोत्कर्षेणावर्तते॥तथा
चोक्तंश्रीवामकौळिकानुभवापिलीलाद्यष्टकाश्रीकामीति॥४३॥भूतानींद्रियदशकंम
नश्चदेव्याविकारषोडशकं॥कामाकर्षिण्यादिस्वरूपतःषोडशारमध्यास्तइति॥४४॥
भूतानिपृथिव्यादीनिइंद्रियदशकंश्रोत्रादिवागादीनिचमनःअंतःकरणप्रधानंसंरक्ष ५३

षोडशकंदेव्याविकारभूतावस्थांतरस्वरूपंकुतःविभर्तीत्यत्राचसादेवीपंचत्वंचसमागता॥आका
शानिलसत्तार्चिःसलिलावनिभेदतःइत्यादिवचनात्॥एवंभूतषोडशकंषोडशारंसर्वाशा
परिपूरकनामधेयंचक्रंकामाकर्षिण्यादिस्वरूपतः॥कामाकर्षिण्यादिषोडशशक्त्या
कारणअध्यास्ते॥अधितिष्ठति॥अधिस्थास्यासांकर्मेतिकर्मत्वं॥सर्वाशापूरिपूरकचक्रे
एताःकामाकर्षिण्यादिगुप्तयोगिन्यःसर्वास्मिकानिवसंतीत्यर्थः॥तथाचोक्तं॥चतुरश्रा
त्यांषोडशारस्वरसंदोहंचतुस्त्रिंशन्मयीकलाः प्राणादिषोडशानांतुवर्णानांषोडशात्मिकाः
बीजभूतस्वरात्मत्वात्तदसौबीजरूपकाः॥अंतरंगतयागुप्ताःयोगिन्यस्तुव्यवस्थि
ताःकामाकर्षणरूपाद्याःसृष्टिप्राधान्यतःप्रिये॥सर्वाशापूरकाख्येतुचक्रेवामेनपू
जयेदिति॥सुभगोदयवासनायांच॥षोडशच्छदपद्मोर्ध्वंभोगभूताथमानसंविकार

समतापन्नभेदेभ्यः संभावयाम्यहंधियि ॥ ४ ॥ मुद्रास्त्रिखंडयासहसंविन्मयः समुत्थिताः
सर्वाः ॥ आदिमहीगृहवासाभासाबालार्ककांतिभिस्सदृशाः ॥ ५ ॥ आधारनवकस्य
स्याः नवचक्रेणैनपरिणतंयेन ॥ नवनाद्राक्तयोपिचमुद्राकारेणपरिणताश्च
क्रैर्नि ॥ ६ ॥ त्रिखंडयासह ॥ त्रिखंडाख्यमुद्रयासाकं समुच्छ्रिताः सर्वोत्कर्षेणव
र्तमानाः ॥ आदिमहीगृहवासाः आदिमध्यचतुरश्रनिलयाः भासाकांत्याबालार्ककां
तिभिः रक्तरुणहरिद्रारुचिभिः सदृशस्तुल्याः संविन्मयः चिद्घनानिष्ठाइत्यर्थः तथा
चोक्तं मोचयंतिग्रहादिभ्यः पात्रोद्धानूद्रावयंतिच ॥ विदिहनामचारिणीमुद्राः त्रिखंडाख्या
तुरवेचरी ॥ सर्वसंक्षोभिणीप्रेरणयोद्राभुद्राभयद्राविण्यः परमानंदद्रावण्यः परम
राक्तयइत्यर्थः ॥ तथाचोक्तं ॥ मोचयंतिग्रहादिभ्यः पात्रोद्धानूद्रावयंतिच ॥ मोच

५४

नंद्रावणंयस्मान्मुद्रास्तापरिकीर्तिताः ॥ इति ॥ एतासुमुद्राचतुरश्रादिभेदांतनवचक्राधि
ष्ठाननायिकाइति ॥ परमशिवेनप्रपंचिताः ॥ दिक्षानमुद्राहीयंनेयथाहि ॥ क्रियाशक्ति
स्तुविश्वस्यमुद्राख्याः यथासंविदंबिकात्रिकूटाकामकलामयात्रिखंडरूपमापन्नास
दसन्निधिकारिणी ॥ सर्वस्यचक्रराजस्यव्यापिनीपरिकीर्तिता ॥ यानिप्रादुर्भवंत्येषा
सर्वसंक्षोभिणीपुनः ॥ वामाशक्तिप्रधानेयंद्वारचक्रास्थिताइत्यारभ्यसंद्रावीः सप्रका
राख्यलाभूमिनयंपुनः योनिमुद्राकलारूपासर्वानंदमयेस्थितेमिसंतं ॥ नन्वेतत्तए
वावधार्यंयच्छ्रुतिरपि ॥ नवानांचक्राणांअधिनाथास्तेनानवमुद्रानवचक्रमहीनां ॥ इति
एतदेवविवृणोति ॥ आधारेत्यादि ॥ आधारनवकं ॥ मूलाधारस्याधिष्ठानेमणि
पूरकअनाहतेविशुद्धेलंबिकाद्वारूपं ॥ अस्याउपासकस्वरूपिण्याः संबंधीये
नहेतुनानवचक्रेणैवंविधास्तनापरिणतेनकारणेननवनाद्राक्तयः एवोक्ता

नवमुद्राकारेण परिणता इत्यर्थः॥ एतच्च वेस्वच्छंदसंग्रहे॥ प्रपंचितं॥ ननु एवावधा
र्यं॥ ४७॥ अस्यात्वगादिसप्तकमाकारश्चैवमष्टकं दृष्टं॥ ब्राह्म्यादिमातृरूपंमध्येश्रु
तिबिंबमेँध्यास्ते॥ ४८॥ अस्योदिव्याःत्वगादिसप्तकंत्वगादिसप्तधातवः ओकारस्व
रूपेचएवंरूपंअष्टकंब्राह्म्यादिमातृरूपंब्रह्म्याद्यष्टशक्तिस्वरूपंदधत्॥ मध्य
भचतुरश्रेनिवसंतीत्यर्थः॥ ४८॥ अणिमादिभूतयोस्यास्वीकृतकमनीयकामि
नीरूपाः॥ विघ्नांतरफलभूताःगुणभावेनांत्यभूमिकेतनागाराः॥ ४९॥ अस्यापर
मेश्वर्याःअणिमाद्यष्टशक्तयःविघ्नांतराणांहठोवगादीनांकृतानिकमनीया
निमनोहराणिकामिनीरूपाणियाभिस्ताएवंभूताः॥ गुणभावेनउपसर्जन
भावेनअंत्यभूमिकेतनागाराःसर्वोत्तचतुरश्रेनिष्ठंतीत्यर्थः॥ अयमर्थः॥ एतादृ ५५
शपरमात्मनोपासनेनसाधकःपरमेश्वरोभवति॥ तथोक्तमभियुक्तैः॥ तदीयैश्व

र्यविद्वद्भिःब्रह्मविष्णुशिवादयः॥ ऐश्वर्यवंतोभासंतेसएवात्मसदाशिवः॥ इति॥ एवंकामकलाविलस
नरूपेचक्रेमंत्रिगम्यएतादृशंचक्रदेवतामंत्रस्वरूपंपरमेश्वरात्मकगुरुक्रमंज्ञानाभावेनल
भ्यतेइति॥ परमशिवादिगुरुक्रमशिष्यानुग्रहेक्षयाप्रतिपादयंस्तुतिनुपक्रमते॥ परमानंद
नुभवदात्रादिगुरुक्रमोविदितइत्यंतेनपरमानंदानुभवःपरमगुरुर्निर्विशेषबिंदुरात्मसपु
नःक्रमेणभिन्नःकामेशित्वंयोविमर्शरूपःसर्वोत्कृष्टः॥ आनंदःपरिपूर्णाहंभा
वरूपोनुभवः॥ ज्ञानंयस्यसः॥ यस्यानंदस्यान्यानिमात्रामुपजीवंतीतिश्रुतेः॥ प्रणामामि
महादेवींपरमानंदरूपिणीं॥ इतिस्तुतिश्च॥ परमगुरुर्निर्विशेषबिंदुरात्मा॥ परमगुरुरादिना
थःपरमशिवः॥ तस्मादादिनाथानुनिर्विशेषःअभिन्नोबिंदुःसर्वोत्तकामकलाविरू
पःसआत्मारूपंयस्यसः॥ आदिनाथरूपेपरमशिवइत्यर्थः अयमर्थः॥ आनंदोब्रह्मसत्यं

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

ज्ञानमनंतब्रह्म॥चिन्मात्रसर्वद्रष्टारंसर्वसाक्षिणंसर्वग्राहकंसर्वमात्मदंसच्चिदानंदमेकरसमेक
यमात्मासन्मात्रोनित्यःशुद्धोबुधःसत्योमुक्तोनिरंजनोविभुरव्ययआनंदघनसप्रकाशमर्थो
त्मापरमेश्वरएवपरमकारुणिकःस्वयमेवस्वात्मानंकामकलाबिंदुरूपकामकामेश्वरीरूप
द्विव्यमिथुनप्रभुरविद्व्यसिद्धमानौधात्रिकमावतीर्णौगुरुमंडलासनूकृत्वनम
स्कृत्यभक्तानांसंरक्षनीतिरहस्योपनिषदिश्रूयते॥तथायदेषांचक्रमेनचक्रंभवतूयथा
भिन्नोसबिंदुरभवत्॥सओंधारोजानःसोमात्मायमात्मासआत्मैवएवंसाभास्तीति॥त
थाहुराचार्याःएकोनार्वकः॥उभयरूपोजायते॥उभौनित्यौएकमेवोभौअविनाभावान्
ओंधारवयवस्तानितत्तोगुणाजायंतेलिंगानितानिपिंडानिसात्रात्रिरभवत्॥तद्प्येषश्लो
कोभवति॥भावाभावमयोबिंदुःभावषष्ठात्मकोभोगःभावात्मकंतुतन्मध्यंचारुभावत्र ५६

यात्मकमिति॥तदेषाभुक्ता॥मध्येचक्रंत्रिवेबिंदोप्रपंचलोकः लोकोदेहःसनारूपःसत्राब्द
रूपःअर्थात्मिकात्रात्रिःचक्रंतनुः॥बिंदुःप्राणःमध्येत्रात्रिरित्यादिना॥चक्रदेवतास्वरू
पनिरूपणंपुरस्सरंकामकामेश्वरीस्वरूपमेवनिरूपितं॥तदेषाभुक्ता॥परावाएषआ
नंदःसभोगयोनिः॥कामरूपावेतौसआनंदयोनिः॥आनंदोब्रह्मब्रह्मैवसनूब्रह्मा
प्येति॥ब्रह्मवेदब्रह्मैवभवति॥ब्रह्मविद्राप्नोतिपरमित्यादिश्रुतिसिद्धकौमुकळास्वरू
पंपरिसमाप्तंप्रपंचितमितित्रिवेणी॥ ॥इतिश्रीनटनानंदनाथविरचिते
कामकळाव्याख्यानंचिद्वल्लीसंपूर्णं॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥
संवत्१८५८ज्येष्ठवद्यसप्तम्यांभौमवासरेसूर्यकरणेनभैरवःप्रियतानमम ५७